श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

वादिसाध्वस कृतं

# ॥ श्रीवेङ्कटेशविजयस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीवेङ्कटेशविजयस्तोत्रम् ॥

देवतदैवत मङ्गलमङ्गल पावनपावन कारणकारण।
वेङ्कटभूधरमौलिविभूषण माधव भूधव देव जयीभव॥ १ ॥

वारिदसन्निभदेह दयाकर शारदनीरजचारुविलोचन।
देवशिरोमणिपादसरोरुह वेङ्कटशैलपते विजयीभव॥ २ ॥

अञ्जनशैलनिवास निरञ्जन रञ्जितसर्वजनाञ्जनमेचक।
मामभिषिञ्च कृपामृतशीतलशीकरवर्षिदृशा जगदीश्वर॥ ३ ॥

वीतसमाधिक सारगुणाकर केवलसत्त्वतनो पुरुषोत्तम।
भीमभवार्णवतारणकोविद वेङ्कटशैलपते विजयीभव॥ ४ ॥

स्वामिसरोवरतीररमाकृतकेलिमहारसलालसमानस।
सारतपोधनचित्तनिकेतन वेङ्कटशैलपते विजयीभव॥ ५ ॥

आयुधभूषणकोटिनिवेशितशङ्खरथाङ्गजितामतसम्मत।
स्वेतरदुर्घटसङ्घटनक्षम वेङ्कटशैलपते विजयीभव॥ ६ ॥

पङ्कजनीनिलयाकृतिसौरभवासितशैलवनोपवनान्तर।
मन्द्रमहास्वनमङ्गलनिर्झर वेङ्कटशैलपते विजयीभव॥ ७ ॥

नन्दकुमारक गोकुलपालक गोपवधूवर कृष्ण परात्पर।
श्रीवसुदेवज जन्मभयापह वेङ्कटशैलपते विजयीभव॥ ८ ॥

शैशवपातितपातकिपूतन धेनुककेशिमुखासुरसूदन।
कालियमर्दन कंसनिरासक मोहतमोपह कृष्ण जयीभव॥ ९ ॥

पालितसङ्गर भागवतप्रिय सारथिताहिततोषपृथासुत।
पाण्डवदूत पराकृतभूभर पाहि परावरनाथ परायण॥ १० ॥

www.prapatti.com

शातमखासुविभञ्जनपाटव सत्रिशिरःखरदूषणदूषण।
श्रीरघुनायक राम रमासख विश्वजनीन हरे विजयीभव॥ ११ ॥

राक्षससोदरभीतिनिवारक शारदशीतमयूखमुखाम्बुज।
रावणदारुणवारणदारणकेसरिपुङ्गव देव जयीभव॥ १२ ॥

काननवानरवीरवनेचरकुञ्जरसिंहमृगादिषु वत्सल।
श्रीवरसूरिनिरस्तभवादर वेङ्कटशैलपते विजयीभव॥ १३ ॥

वादिसाध्वसकृत्सूरिकथितं स्तवनं महत्।
वृषशैलपतेः श्रेयस्कामो नित्यं पठेत् सुधीः॥ १४ ॥

॥ इति श्रीवेङ्कटेशविजयस्तोत्रं सम्पूर्णम् ॥

www.prapatti.com